# विभक्तिः

२० – १४.०५.२०१६

## व्योम-संस्कृत-पाठशाला
## www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- पञ्चमीविभक्तिः
  - अपादानम् १ – विभागस्य अवधिः।
  - वृक्षात् पतति, ग्रामात् आगच्छति, शालायाः आनयति।
  - अपादानम् २ – भयस्य/रक्षणस्य कारणम्।
  - व्याघ्रात् भीतः, परीक्षायाः त्रस्तः, चोरात् रक्षति, दुष्टात् त्रायते।
  - अपादानम् ३ – नद्याः प्रभवः।
  - हिमालयात् प्रभवति, भागमण्डलात् प्रभवति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- पञ्चमीविभक्तिरूपाणि
  - बालात्	बालाभ्याम्	बालेभ्यः
  - मित्रात्	मित्राभ्याम्	मित्रेभ्यः
  - बालिकायाः	बालिकाभ्याम्	बालिकाभ्यः
  - नार्याः	नारीभ्याम्	नारीभ्यः

# सर्वनाम्नां पञ्चमीविभक्तिरूपाणि

| | | |
|---|---|---|
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्याः | ताभ्याम् | ताभ्यः |
| एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतस्याः | एताभ्याम् | एताभ्यः |
| मत् | आवाभ्याम् | अस्मत् |
| त्वत् | युवाभ्याम् | युष्मत् |

# पुनरावर्तनम्

- उपपदपञ्चमी
  - बहिः।
  - ग्रामाद् बहिः। शालायाः बहिः।
  - पूर्व/पर।
  - स्नानात् पूर्वम्। भोजनात् परम्। लक्ष्मणात् पूर्वः भरतः।
  - ऋते/विना।
  - कृष्णाद् ऋते शरणं नास्ति। जलं/जलेन/जलात् विना मीनाः न जीवन्ति।

# जश्त्वसन्धिः

- वृक्षात् पतति।
- गृहात् प्रस्थितः।
- मित्रात् स्वीकरोति।
- हिमालयात् प्रभवति।
- स्नानात् पूर्वम्।
- भोजनात् परम्।
- वृक्षाद् आनयति।
- गृहाद् आगतः।
- मित्राद् बिभेति।
- चोराद् रक्षति।
- ग्रामाद् बहिः।
- कृष्णाद् विना।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# जश्त्वसन्धिः

- वर्गस्य १/२ वर्णः, श्, ष्, स् = प्रथमवर्णः (चर्)
- वृक्षात् पतति।
- गृहात् प्रस्थितः।
- मित्रात् स्वीकरोति।
- स्वरः, वर्गस्य ३/४/५ वर्णः, य्,र्,ल्,व्,ह् = तृतीयवर्णः (जश्)
- गृहाद् आगतः।
- मित्राद् बिभेति।
- चोराद् रक्षति।

# अभ्यासः – १

आगच्छति

उद्धूतः

ग्रामः

स्वीकरोति

प्रस्थितः

गच्छति

एव

# अभ्यासः – २

- चोरः+रक्षति।
- सः+स्वीकरोति।
- अहम्+बिभेति।
- आपणः+आगच्छति।
- चषकः+पिबति।
- त्वम्+ऋते।
- रामः+विना।
- सः+तिष्ठति।
- ग्रामः+फलम्।
- व्याघ्रः+दूरम्।
- एषः+बहिः।
- सर्पः+क्रूरः।

# उपपदपञ्चमी – भिन्नः / अन्यः / इतरः

- रामः कृष्णाद् भिन्नः न।
- आचार्याद् अन्या गतिः नास्ति।
- मित्राद् इतरः कः साहाय्यं करोति?

# अभ्यासः – ३ (अन्यत् शरणं न)

- रामः
- देवी
- सन्मित्रम्
- महेश्वरः
- सीता
- सत्यम्

- धर्मः
- गङ्गा
- गायत्री
- ज्ञानम्
- स्वाध्यायः
- शिवा

- गुरुचरणौ
- रामलक्ष्मणौ
- सीतारामौ
- सज्जनाः
- मुनिवराः
- देवाः

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पञ्चमीविभक्तिः – सङ्क्षेपः

- अपादाने पञ्चमी
  - विभागस्य अवधिः। वृक्षात् पतति। ग्रामाद् आगच्छति।
  - भयस्य कारणम्। व्याघ्राद् बिभेति। चोरेभ्यः रक्षति।
  - नद्याः प्रभवः। हिमालयाद् गङ्गा प्रभवति।
- उपपदपञ्चमी
  - बहिः। गृहाद् बहिः। शालायाः बहिः।
  - पूर्व/पर। चैत्रः वैशाखात् पूर्वः। स्नानात् परं भोजनं करोति।
  - ऋते/विना। ज्ञानाद् ऋते कैवल्यं नास्ति। जलाद् विना मीनाः न जीवन्ति।
  - भिन्नः/अन्यः/इतरः। तस्माद् भिन्नः। कृष्णाद् अन्यः।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# षष्ठीविभक्तिः

# षष्ठीविभक्तिः - प्रयोगाः

- सीता रामस्य पत्नी।
- एतत् मालायाः पुस्तकम्।
- सः माधवस्य पिता।
- एषः आम्रफलस्य रसः।

# सम्बन्धः

- द्वयोः पदार्थयोः सम्बन्धं बोधयति षष्ठीविभक्तिः।
- मम पुस्तकम्।
- मम हस्तः।
- मम पुत्री।
- मम माता।
- मम देशः।

# अभ्यासः – ४

# रामः

- दशरथः – पुत्रः।
- अजः – पौत्रः।
- वसिष्ठः – शिष्यः।
- लक्ष्मणः – अग्रजः।
- लवः – पिता।
- रावणः – शत्रुः।
- कौसल्या – सुतः।
- सीता – पतिः।
- अहल्या – मोक्षदायकः।
- शबरी – आराध्यः।
- इन्दुमती – नप्ता।
- अयोध्या – राजा।

# अभ्यासः – ५

## कृष्णः

- वसुदेवः – पुत्रः।
- कंसः – भागिनेयः।
- बलरामः – अनुजः।
- अर्जुनः – मित्रम्।
- प्रद्युम्नः – पिता।
- अनिरुद्धः – पितामहः।
- देवकी – सुतः।
- रुक्मिणी – पतिः।
- द्रौपदी – रक्षकः।
- राधा – प्रियः।
- पूतना – घातकः।
- यशोदा – वत्सः।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ६


पुत्रः/पुत्री
शिष्यः/शिष्या
पौत्रः/पौत्री
मित्रम्
अहम्
दौहित्रः/दौहित्री
पिता/माता
पतिः/पत्नी
सहोदरः/सहोदरी